# Shri Bhavanandacharyakritam Bhavanatrayam

# શ્રીભાવાનન્દાચાર્યકૃતં ભાવનાત્રયમ્

## Document Information

Text title : Shri Bhavanandacharyakritam Bhavanatrayam

File name : bhAvanAtrayam.itx

Category : misc, rAmAnanda, advice, upadesha

Location : doc_z_misc_general

Author : bhAvAnandAchArya

Transliterated by : Mrityunjay Pandey

Proofread by : Mrityunjay Pandey

Description/comments : From Chatuh Sampraday Dig-Darshan

Latest update : November 11, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 11, 2023

*sanskritdocuments.org*

# શ્રીભાવાનન્દાચાર્યકૃતં ભાવનાત્રયમ્

નત્ત્વા રામં ચ શ્રીરામાનન્દં ભાષ્યકૃતં ગુરુમ્ ।
હિતાવહં મુમુક્ષૂણાં કરોમિ ભાવનાત્રયમ્ ॥ ૧॥

નિજં કારાગૃહે બદ્ધં પતિતં ચ મહાર્ણવે ।
ભુજઙ્ગવિષમૂઢં ચ મુમુક્ષુર્ભાવયેત્ સદા ॥ ૨॥

તત્ર કારાગૃહં દેહસ્તથા દેહાનુબન્ધિનઃ ।
સમ્બન્ધિશ્ચ વિજ્ઞેયા ભાર્યાપુત્રાદયઃ ખલુ ॥ ૩॥

તત્રસ્થા અવગન્તવ્યા અહન્તામમતાદયઃ ।
આવરણં તથા ચાશાઽવિવેકો નિગડો મતઃ ॥ ૪॥

દશેન્દ્રિયાણિ બોધ્યાનિ તત્રસ્થા અધિકારિણઃ ।
આલમ્બનં મનો જ્ઞેયં બદ્ધોઽહં સ્વેન કર્મણા ॥ ૫॥

મોચકો મમ તસ્માદ્ધિ શ્રીરામઃ સકલેશ્વરઃ ।
મુમુક્ષુર્ભાવયેદેવં કારાબદ્ધં નિજં સદા ॥ ૬॥

ઇતિ શ્રીભાવાન્દાચાર્યકૃતે ભાવનાત્રયે કારાબદ્ધભાવનાત્મકઃ પ્રથમઃ ।

પરિચ્છેદઃ ॥ ૧॥

આશામહામ્બુભિઃ પૂર્ણઃ સંસારશ્ચ મહાર્ણવઃ ।
વાયુક્ષોભો મતસ્તત્ર વિકારો માનસશ્ચ હિ ॥ ૧॥

રાગઃ ખલુ મહાવર્ત્તો યાદાંસિ મમતાદયઃ ।
પરમ્પરા બોધ્યાસ્તત્ર ચાધ્યાત્મિકાદયઃ ॥ ૨॥

તનુર્ભગ્નઃ પ્લવો વેદ્યો ભારાસ્તદ્રક્ષણાદયઃ ।
મહાર્ણવે ચ તસ્મિન્ પતિતઃ સ્વેન કર્મણા ॥ ૩॥

તારકો મમ તસ્માદ્ધિ શ્રીરામઃ સકલેશ્વરઃ ।
ક્ષુર્ભાવયેદેવં મહાબ્ધૌ પતિતં નિજમ્ ॥ ૪॥

ઇતિ શ્રીભાવાનન્દાચાર્યકૃતે ભાવનાત્રયે મહાર્ણવપતિતભાવનાત્મકો દ્વિતીયઃ ।

પરિચ્છેદઃ ॥ ૨॥

વલ્મીકં ચ તનુસ્તત્ર ભુજઙ્ગા ઇન્દ્રિયાણિ હિ ।
તદ્વિષયસ્તસ્ય સન્નિધિર્દંશનં મતમ્ ॥ ૧॥

વિષયાનુભવો વ્યાપ્તિર્મોહો મૂર્ચ્છા પ્રકીર્ત્તિતા ।
ભુજઙ્ગદષ્ટોઽસ્મિ સ્વેનૈવ ખલુ કર્મણા ॥ ૨॥

વિષઘ્નમૌષધં ચાત્ર શ્રીરામઃ સકલેશ્વરઃ ।
ક્ષુર્ભાવયેદેવં સર્પદષ્ટં નિજં સદા ॥ ૩॥

ઇતિ શ્રીભાવાનન્દાચાર્યકૃતે ભાવનાત્રયે ભુજઙ્ગવિષમૂઢભાવનાત્મકર્તૃતીયઃ ।

પરિચ્છેદઃ ॥ ૩॥

રામાનન્દાર્યશિષ્યશ્રીભાવાનન્દાર્યનિર્મિતમ્ ।
મોદાવહં મુમુક્ષૂણાં ભવતાદ્ ભાવનાત્રયમ્ ॥

ઇતિ શ્રીભાવાનન્દાચાર્યકૃતં ભાવનાત્રયં સમ્પૂર્ણમ્ ।

Encoded and proofread by Mrityunjay Pandey

*Shri Bhavanandacharyakritam Bhavanatrayam*
pdf was typeset on November 11, 2023

Please send corrections to *sanskrit@cheerful.com*